Shri Raghunatha Temple MSS. Library,
JAMMU

१२६०

No. क

Title बटुकबलि प्रदान विधिः

Author

Extent ६ पत्र Age

Subject तन्त्र

S720

वटुकबलिप्रदानविधिः

नं० १२६०

। अथ बटुकबलिप्रदानविधिः ।

श्री· श्रीवटुकभैरवायनमः अथबलिदानप्रकारः कृत
१ नित्यक्रियः साधकः पूर्वाभिमुखः ईशानकोणेअष्टद
लकमलंरक्तचंदनेनविलिख्य ह्रः वः अस्त्रायफट् इ
त्यस्त्रमंत्रेणस्वात्मरक्षांकृत्वा गंविघ्नेशायनमः इतिवा
मेगणपतिंपूज्य दुंदुर्गायैनमः इतिदक्षिणेदुर्गांपूज्य
त्रिकोणगर्भितेपात्रेहैमेरौप्येचकांस्यके मृण्मयेचापि
देवेशिह्वलिंदद्याविधानतः अन्नंशालिसमुद्भूतंमां
संशुष्कंसशर्करम् लाजाचूर्णंगुडापूपंमाक्षिकेक्षुरसा
न्वितम् घृतप्लुतंसर्वमेवएकीकृत्यमहेश्वरि कृत्वाक

वलमाराध्य वटुकेशं महाबलम् रक्तपुष्पाक्षतैर्धूपै
रक्तचंदनसंयुतैः अर्चयित्वाथ तत्पिंडं गंधाद्यैर्मूल
मंत्रतः बलिं दद्याद्ययनमस्त्रसुक्काचार्चयेद्बुधः ततोज
लं समादाय चुलके न महेश्वरि मूलमंत्रं समुच्चार्य सं
बोध्य वटुकं प्रिये इमं बलिं गृह्ण युग्मं स्वाहांतं समुद्दी
र्य च जलं समर्पयेत्तत्र बलिदाने मनुः स्मृतः प्रकाशं मू
लं भोभो आपदुद्धारण वटुकनाथ भैरव इमं बलिं गृह्ण
गृह्ण स्वाहा शत्रुपक्षस्य रुधिरं पिशितं च दिने दिने भक्ष
यस्व गणैः सार्धं सारमेयसमन्वितः बलिमंत्रोयमाख्या

श्री॰ तः सर्वेषां विजयप्रदः अनेन विधिना हृष्टो वटुकः
२ परसैन्यकम् सर्वगणेभ्यो विभजेदामिषं क्रुद्धमानसः
2 एवं कृते शत्रुबलं क्षीयते नात्र संशयः इत्यर्धरात्रे या
ममात्रे गते वा स्थानकेभ्यो बलिं बहिर्दद्यात् यदि सा
र्वं भक्षयेत् तदाशीघ्रं सिद्धिः अर्धे विलंबो कार्यं भवे
त् यदि न भक्षयेत् तदा न कार्यम् संपूर्णे दिने छाग
बलिं दद्यात् इति बलिदानम् चतुष्पथे नदीतीरे गो।
ष्ठे शून्यालये तथा यामे मात्रे गते रात्रौ तथा वार्धरात्रके।
स्थानकेभ्यो बलिं दत्वा कृत्स्नं सैन्य तस्य वर्णितः स्याच्च चतुर्वि

धो देवि वर्णभेदेन पार्वति श्वेतवर्णो ब्राह्मणः स्याद्रक्तः
क्षत्रिय उच्यते पीतो वैश्यः कृष्णवर्णो म्लेच्छाख्यः परिकी
र्तितः शांतिकर्मणि ब्रह्मा स्यात्पुष्टौ राजन्य उच्यते वैश्यो
रोगनिवृत्यादौ मारणे म्लेच्छ उच्यते इति वर्णप्रभेदेषु स्था
नकेषु बलिं हरेत् ततः पूजां समासाद्य विहरेत्साधकः
सुखमिति श्रीविश्वनाथसारोद्धारतंत्रे बटुकबलिदान
विधिः संपूर्णः ॥

श्री:

१

3

अथ वटुकदीपदानविधिः शुभे मुहूर्त्ते होरायां गीत
वादित्रसंयुतः दीपदानं परं देयं साधकेन विशेषतः अ
ष्टादित्तुत्तीर वृक्षोद्भवान्कीलान्महेश्वरि रक्तसूत्रेण सं
वेष्ट्य दीपान्दद्याद्विचक्षणः सौवर्णान्राजतान्ताम्रा
न्मृण्मयान्पिष्टसंभवान् पलप्रमाणान्देवेशि तादृक्
तैलप्रपूरितान् तैलं सर्षपसंभूतं मध्यदीपं घृतेन तु
गवाज्येन महादेवि मध्यमं दीपमाचरेत् इति दीपं संपा
द्य रक्तसूत्रेण कुर्वीत वर्त्ति सहस्रेण संयुताम् संपाद्यते।
लंचामथ गायत्र्या मूलमंत्रतः द्वादशांगुलनिर्माणेन

गोधूमपिष्टसं
भवान्

श्री· दर्पंवामहेश्वरि मंडलंविरचेद्धीमान् गौरमृत्तिकया
५ शुभम् तदूर्ध्वं विलिखेच्चक्रं शुभरेखंमनोरमम् त्रि
कोणंबिंदुसंयुक्तं मष्टपद्मं सुशोभितम् पत्रेषुतैल
दीपानिमध्येगोघृतसंभवम् कुर्य्यात्सप्तभौमवारे
रविवारेचपार्वति तथाचतुर्दशीपर्य्यंतं दीपस्यव्रतमा
चरेत् पूर्णेदिनेकुर्य्याद्भागं बलिंदद्याद्द्विचक्षणः स्व
गुरुंपूजयेद्भक्त्याधनधान्यादिवस्त्रकैः ततोविसर्जये
द्दीपंसावधानेनचेतसा अनेनदीपदानेनवटुकेशः
प्रयच्छति धनंधान्यंतथारोग्यंशत्रुनाशंमहोदयम्
हो

ददते वाञ्छितं सद्यः साधकस्य तु पार्वति आपदुद्धारणो
यस्मादन्यो नास्ति जगत्त्रये तस्मात्त्रोक्तो वटुकेशो विवि
विधापद्विनाशकः इत्युद्धारः प्रकाशम् आसनस्थु
द्धि भूतशुद्धि प्राणायामां तर्मीकाबहिर्मातृकान्यास
स्वमूलन्नष्यादिन्यासानंतरं पात्रस्थापनांतं पूजाकर्म
समाप्य वटुकपात्रं पूजापद्धत्युक्तक्रमेण संस्थाप्य अ
पसर्पंतु भूतानीत्यस्य मंत्रेण अपसर्पंतु भूतानि ये भू
ता भुवि संस्थिताः ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञ
या इति मंत्रेण भूतापसारणं कृत्वा कुलद्रव्याणि सर्वा

णी संभृत्य गोरमृत्तिकया द्वादशांगुलं मंडलं सुशोभनं
विधाय सिंदूरेण स्वात्मनि तिलकं कृत्वा ओं ङ्कः वीरभस्म
ने फट् स्वाहा इति तिलकमंत्रः ततः सिंदूरमिश्रितपिष्टेन
रक्तचंदनेन वा अष्टदलकमलं त्रिकोणविंदुसहितं मंड
लं विपुलं कृत्वा अष्टदलेषु अष्टदीपानि तैलपूरिता
मध्ये त्रिकोणे दीपत्रयं मध्ये कर्णिकायां गोघृतपूरितं
संस्थाप्य मूलेन गायत्र्या च रक्तवर्णां वर्त्तिं दत्वा गाय
त्रीमंत्रो यथा मूलं ओं ह्रीं वटुकाय विद्महे आपदुद्धार
णाय धीमहि तन्नो भैरवः प्रचोदयात् इति गायत्र्यादी

पेषु वर्त्तिकां संस्थाप्य ॐ ह्रीं वटुकाय कपिलजटाभार
भूषितभूषणाय इमं दीपं गृह्ण २ एह्येहि खं खं खदि
र मम विघ्नं भंजय २ स्वाहा इति मंत्रेण दीपं प्रार्थ्य न
या प्रज्वाल्य दीपस्य च्छुरितं शाट्वं वर्जयेत् विचक्षणः
दीप शांतौ महाविघ्नं तस्माद्दीपं तु रक्षयेत् ततो दीपा
न् प्रज्वलितान् संवीक्ष्य दीपपूजां कुर्यात् यथा ॐ ह्रीं
मंडूकाय नमः १ कालाग्निरुद्राय नमः २ मूलप्रकृत्यै
नमः ३ आधारशक्त्यै नमः ४ कूर्माय नमः ॐ अनंताय
नमः ५ आधारशक्तिकमलासनाय नमः ६ श्रीवटुक

श्री॰
६
6

नाथभैरवयोगपीठदीपासनायनमः इतिदीपेषुपीठ
पूजांकृत्वा देवमावाहयेत् ॐक्लींसद्योजातायनमः इ
त्यावाहनम् ॥ वामदेवायनमः इतिसान्निध्यम् ॥ अघो
रायनमः इतिसन्निरोधनम् ॥ तत्पुरुषायनमः इतियो
न्यावगुण्ठनम् ॥ ईशानायनमः इतिगंधपुष्पाक्षतधू
पदीपवस्त्रम् ततः प्राणप्रतिष्ठा ॐक्रांह्रींक्रौं वटुकस्यदी
पेप्राणाइहप्राणाः ॥ जीवइहस्थितः ॥ सर्वेंद्रियाणी
हस्थितानि ॥ वाङ्मनश्चक्षुर्जिह्वाघ्राणप्राणाइहागत्य
सुखंचिरंतिष्ठंतुस्वाहा इतिप्राणप्रतिष्ठांलेलिहानमु

मुद्रवासं स्थाप्य देवं वटुकं पंचोपचारैः संपूज्य आव
णीपूजां दीपेकुर्यात् आदौ बिंदौ मूलं श्रीवटुकनाथा
भैरवश्रीपादुकां पूजयामि नमः तर्पं· ततो प्रथमे दीपेग
रुपूजा श्रीगुरुपादुकाभ्यो नमः गं गणेश श्री· दुं दुर्गा
श्री· ॐ क्षीं जयंतायनमः ॐ अघोराय· रं चामीकराय·
रं प्रसिद्धाय· ॐ प्रसिद्धनराय· रं भीषणाय· रं प्रचंडा·
ॐ करालाय· रं कपालिने· रं वटुकाय· रं कालभैर
वाय· रं रुरुभैर· रं चंडभै· रं क्रोधभै· रं उन्मत्तभै· रं
कपालिभै· रं भीषणभै· ॐ संहारभै· रं विधातृभै· रं

श्री॰ अनंतभै॰ ऱ्हीं शाकिनीपुत्रायनमः ऱ्हीं शाकिनीपु॰ ऱ्हीं मालि
७ नीपु॰ ऱ्हीं देवीपुत्रा॰ ॐउमापु॰ ऱ्हीं चंडीपु॰ ऱ्हीं ब्राह्मीपु॰ ऱ्हीं
कालीपु॰ ऱ्हीं ह्राकिनीपु॰ ऱ्हीं ब्रह्माणीपु॰ ऱ्हीं माहेश्वरीपु॰ ऱ्हीं मा
हेंद्रीपु॰ ऱ्हीं चामुंडापु॰ ऱ्हीं इंद्राणीपुत्रा॰ ऱ्हीं वैष्णवीपु॰ ऱ्हीं वारा
हीपु॰ ऱ्हीं कौमारीपु॰ ऱ्हीं क्रोधिनीअंबाश्रीपा॰ ऱ्हीं स्तंभिनी
अं॰ ऱ्हीं चर्मधारिणीअं॰ ऱ्हीं धर्मधारिणीअं॰ ऱ्हीं अष्टभैरवीअं॰
ऱ्हीं सौभाग्यदायिनीअं॰ ऱ्हीं जगन्मोहिनीअं॰ ऱ्हीं जगाकर्षांकरी
अं॰ ऱ्हीं उड्डामरपीठेशा॰ ऱ्हीं जालंधरपीठेशा॰ ऱ्हीं कामरूपपी॰
ॐ कामाख्यपी॰ ऱ्हीं सिद्धविमलानंदपी॰ ऱ्हीं सिद्धनाथपरमे।

ष्ठिघी॰ ह्रीं श्रीगुरुपीठश्री॰ ह्रीं सुभगाश्री॰ ह्रीं विजयाश्री॰
ह्रीं नंदाश्री॰ ह्रीं आनंदांबाश्री॰ ह्रीं भगसिद्धाश्री॰ ह्रीं भगमालि
नीश्री॰ ह्रीं भगिनीपातिनीश्री: ॐ इंद्रश्री॰ ह्रीं अग्नि॰ ह्रीं यम॰
ॐ नैऋति॰ ह्रीं वरुण॰ ह्रीं वायु॰ ह्रीं कुवेरश्री॰ ह्रीं ईशान॰ ह्रीं ब्र
ह्मश्री॰ ह्रीं विष्णुश्री॰ ह्रीं वज्रश्री॰ ह्रीं ह्रीं श्रीं क्लीं सर्वज्ञाय
प्रचंडपराक्रमाय वटुकाय इमंदीपंगृह्णाण २ ममसर्व।
कार्यंसाधय २ दुष्टान्नाशय २ त्रासय २ सर्वतोममरक्षां
कुरु २ हूं फट् स्वाहा इतिंदीपान् नमस्कृत्य ततोनिब। मंत्रेण॰
लिंदद्यात् दीपाग्रे प्रजपेन्मंत्रंकवचंच विशेषतः ततो

श्री· गुरुं सम्संतोष्य द्रव्यकर्माश्रमादिभिः गुरौतुष्टे महादेवि
८ संतुष्टाः सर्वदेवताः वटुकेशो महावीरः कातिवीर्यार्जु
नस्तथा त्रिदशाच्चत्तरीविद्याश्मशानभैरवी तथा गणेशा
श्चैवदुर्गाचदशविद्यानृसिंहकः एतेदीपप्रियानित्यंदीपदा
नंततश्चरेत् इत्येषपटलेगुह्यो दीपदानस्यपार्वति गो
पनीयोगोपनीयोनान्यथाशिवभाषितम् कल्याणम
स्तु श्रीरामसिंहभूपस्य ईंशक्तिः ईंदंड· ईंखड्ग· ईंपा
श· ईंध्वज· ईंगदा· ईंत्रिशूल· ईंपद्म· ईंचक्र· इतिदी
पेषुवटुकपात्रामृतेनसंतर्प्यसंपूज्य मध्येपुनर्वटुकं

8

सन्तथा मूलेन सांगं सपरिवारं सायुधं संतर्प्य पूजामध्ये
दीपप्रकाशेन कार्यात्वमतिर्हैया तदग्रे मूलं यथाशक्ति
जप्त्वा कवच सहस्रनामाष्टोत्तरशतस्तोत्रं यथाशक्त्या वि
धाय दीपाग्रे बलिदानं च कृत्वा शांतिस्तोत्रमारतीं च पठि
त्वा श्रीगुरुं संतोष्य प्रणम्य देवं स्वहृदि संहारमुद्रया वि
सृज्य दीपान्विसर्जयेत् इति दीपदानविधिसमाप्ताः ॥

स्त्री॰

८

१

(वटुकदीपदानविधिः)

